# 2. धर्मप्रमाणानि

धर्मशास्त्रविद्भिः शास्त्रकारै चत्वारि धर्मप्रमाणानि स्वीकृतानि। तानि सन्ति वेदः स्मृति सदाचारः आत्मतुष्टिश्च। यथाह मनुः–

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।**

–मनुस्मृति-2/6

वेदः, स्मृतिरर्थात् धर्मशास्त्रं, शीलमर्थात् रागद्वेषादि रूपस्वभावः साधूनामाचारः आत्मतुष्टिश्चैवेते धर्ममूलभूतत्त्वेन गृहीताः। याज्ञवल्क्योऽपि मनोर्मतं स्वीकृत्य वचनान्तरेण कथयति–

**श्रुतिः स्मृतिः सदाचार; स्वस्य च प्रियमात्मनः।**
**सम्यक् संकल्पज; कामो धर्ममूलमिदं स्मृतम् ।।**

(याज्ञवल्क्यस्मृतिः 1/7)

तात्पर्यमिदं यत् श्रुतिरर्थात् वेद; स्मृतिरर्थात् धर्मशास्त्रं, सदाचारर्थात् शिष्टानामाचारोऽनुष्ठानम् आत्मनः यत् प्रियमित्यादावात्मेच्छैव नियामिका, सम्यक् संकल्पजातः कामश्च एते धर्मे प्रामाण्यं भजन्ति। एतेषु धर्महेतुषु धर्मस्यकारकहेतुविषये याज्ञवल्क्येनैव प्रतिपादितम्–

**देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम्।**
**पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम्।।**

(याज्ञवल्क्यस्मृतिः1/6)

अर्थात् देशशब्देन आर्यावर्तादयः देशा गृह्यन्ते काल इत्यनेन संक्रान्त्यादीनां ग्रहणम् भवति, उपायः शास्त्रोक्तेतिकर्तव्यताकलापः, द्रव्य इत्यनेन प्रतिग्रहादिलब्धगवादिगृह्यते, श्रद्धाशब्दः आस्तिकबुद्धेर्ग्रहणं करोति, पात्रशब्दस्य व्याख्यानं याज्ञवल्क्येनाचाराध्याये कृतम्–

**न विद्यया केवलया तपसावापि पात्रता।**
**यत्र ब्रूतमिमे चोभे तद्धिपात्रं प्रकीर्तितम्।।**

(याज्ञवल्क्यस्मृतिः 1/200)

एतदतिरिक्तमन्यदपि शास्त्रोक्तं जातिगुणहोमयागादि तत्सकलं धर्मस्यकारणं यतः जातिगुणद्रव्यक्रियाभावार्थात्मकं चतुर्विधधर्मस्य कारणमित्युक्तं भवति। तच्च समस्तं व्यस्तं वा यथाशास्त्रं द्रष्टव्यम्। पुनः याज्ञवल्क्यः कारकहेतूनामपवाद; कथयति–

Scanned by CamScanner

**इत्याचारदमाहिंसा दानस्वाध्यायकर्मणाम्।**
**अयं तु परमो धर्मः यद्योगेनात्मदर्शनम्''**

(याज्ञवल्क्य 1/8)

अर्थात् इज्यादीनां कर्मणामयमेव परमो धर्मः यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनमर्थात् यथातथ्यज्ञानमिति यागेनात्मज्ञाने देशादिनियमो नास्तीति। कारकहेतुषु ज्ञापक हेतेषु संदेहे समुत्पन्ने निर्णयहेतुः याज्ञवल्क्येन प्रतिपादितः–

**चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा।**
**सा ब्रूते यं स धर्मःस्यादेको वाऽध्यात्मवित्तमः॥**

(याज्ञवल्क्य-1/9)

चत्वारो वेदधर्मज्ञाः ब्राह्मणाः पर्षत्पदेनाभिधीयन्ते। एतादृशः पर्षत् वा ऋग् यजुस्सामादित्रिविद्यायां निपुणाः त्रयो ब्राह्मणा अथवा आध्यात्मज्ञाने निपुणः एकोऽपि धर्मशास्त्रज्ञः यं ब्रूते सोऽपि धर्मः। मनुयाज्ञवल्क्यादिभिः प्रोक्तानां धर्मप्रमाणानां पृथक् पृथक् परिचयः निम्नांकितः स्यात्।

**1. वेद**–विधिमन्त्रनामधेयनिषेधार्थवादानां च सम्मिलितरूपं भवति वेदः। तत्र याज्ञवल्क्यस्मृतौ याज्ञवल्क्येन विद्यानां धर्मस्य च चतुर्दशस्थानानि प्रोक्तानि सन्ति येषु चतुर्णां वेदानां परिगणनं कृतमस्ति। यथाह–

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥**

(याज्ञवल्क्यस्मृतिः-1/3)

अर्थात् ब्रह्मादिपुराणानि, न्यायशास्त्रं, मीमांसाशास्त्रम्, धर्मशास्त्रम् शिक्षाकल्पव्याकरणनिरुक्त ज्योतिषादीनि षट्वेदांगानि तथा च ऋग्यजुःसामाथर्ववेदाः भवन्ति धर्मस्य चतुर्दश स्थानानि। प्रकीर्णासु वेदशाखासु संहिता-ब्राह्मण-आरण्यकउपनिषत्सु बहवः धर्मशास्त्रीयाः विषयाः प्रोक्ता इत्यतः वेदस्य प्रामाण्यं स्वीक्रियते धर्मे।

**2. स्मृतिः**–सकलधर्मशास्त्रसाहित्ये श्रुत्या सह स्मृतेरर्थात् धर्मशास्त्रस्य सम्बन्धः प्रतिपादितः। तदनुसारं धर्मस्य मूलमस्तिवेदः। वेदानुमोदिताचार; धर्मशास्त्रस्य मूलम् तस्मात् कारणात् स्मृतिः स्मार्ताचाराश्च धर्मनिमित्तं प्रमाणानि भवन्ति। श्रुतिमनुगच्छन् स्मृतिः सामाजिक-विधिव्यवस्थानां व्यवस्थापनं करोति। वैदिकसाहित्ये विद्यमानाः नियमा; विविधरूपेण स्मृतौ संस्थापिताः सन्ति। वेदानां दुरुहत्वात् कालक्रमेण श्रुत्यवेत्तया स्मृतिः जनसाधारणानां मध्ये अधिकां लोकप्रियतामभजत। साधारणजना श्रुतिमध्ये तु असमर्थाः परञ्च त एव स्मृतिमध्ये तु समर्था जायन्ते यतोहि श्रुत्यापेक्षया स्मृतेः भाषा सरला सुबोधा चास्ति। बृहस्पत्यनुसारं श्रुतिः

Scanned by CamScanner

स्मृतिश्च ब्राह्मणस्य द्वौ बान्धवौ भवतः। स्मृतेरध्यनं विना पाण्डित्यं परिपूर्णं न भवति। अतः परिवर्तितपरिस्थित्या सह प्रमाणं लभमाना स्मृतिः जनैः विशेषरूपेणादृता जाता।

**3. सदाचारः**—सज्जनानां शिष्टपुरुषाणामाचारः सदाचार इति। श्रुतिस्मृतिप्रमाणाभावे सदाचारोऽयं धार्मिकजनैः धर्मप्रमाणरूपेण स्वीक्रियते। स्वयं मनुः धर्मप्रमाणानामुपस्थापनसमये धर्मज्ञानां विदुषां द्वेषरागरहितमाचरणस्य प्रमाणं धर्मनिमित्तं स्वीकरोति। गौतममतानुसारं तस्यैव सदाचारस्य ग्रहणीयता भवति यः श्रुतिस्मृतिविरोधी न भवति।

4. धर्मप्रमाणेषु अन्तिमप्रमाणमस्ति आत्मतुष्टिः। आत्मतुष्टिः सर्वदा धर्मे प्रामाण्यं न भजति। आत्मतुष्टेः प्रामाण्यं शास्त्रे विषयमेकमुद्दिश्य प्रोक्तेषु विविधविकल्पेष्वेव स्वीक्रियते तथा च यदा द्वयो वचनयोः विरोधभाव; समापतित; तदा किमप्येकं मतं ग्रहणीयं भवति। आत्मतुष्टिरर्थात् प्रतिपादितेषु पक्षेषु यस्मिन् पक्षे आत्मसंतोषः स्यात्स एव पक्षः पालनीयः।

Scanned by CamScanner